दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-11 | 1 | नवम्बर, 02 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् कार्तिकशुक्लएकादशी
कार्तिक १७ प्रविष्ठांशः मङ्गलमयः भवेत्

2 राज्ये चिट्टा इति मादकद्रव्यस्य विरुद्धं निर्णायकं युद्धं करिष्यति सर्वकारः, नवम्बर १५ दिनाङ्के शिमलातः आरम्भः भविता"- मुख्यमंत्री सुक्खुः

3 सरदारपटेलविश्वविद्यालये मण्डी इत्यत्र "राष्ट्रनिर्माता सरदारपटेलः - विषये राष्ट्रियसंगोष्ठी आयोजिता

4 चरित्रनिर्माणव्यक्तित्वस्य च समग्रविकासार्थं त्रिदिवसीया राष्ट्रीयकार्यशाला आयोजिता

# प्रधानमन्त्रिणा नरेन्द्रमोदिना छत्तीसगढ़े चतुर्दशसहस्र-रुप्यतोऽप्यधिकानां परियोजनानां उद्घाटनं शिलान्यासञ्च विहितम्



**हिमसंस्कृतवार्ताः** - प्रधानमन्त्री नरेन्द्रमोदी छत्तीसगढ़स्य यात्रावधौ नवा-रायपुरस्थले छत्तीसगढ़-विधानसभायाः नूतन-भवनस्य उद्घाटनम् अकरोत्। अत्रावसरे प्रधानमन्त्री पूर्व-प्रधानमन्त्रिणः तथा भारत-रत्न-विभूषितस्य अटल बिहारी वाजपेयीवर्यस्य प्रतिमामपि अनावृतवान्। उपस्थितं जनसमूहं सम्बोधयन्, प्रधानमन्त्री अवदत् यत् अद्य सम्पूर्णदेशः स्वकीयं न्यासं संरक्ष्य विकासमार्गे अग्रे प्रसरति। सः अवदत् यत् एष एव भावः केन्द्रीय-सर्वकारस्य प्रत्येकस्मिन् निर्णये तथा नीतौ च दृश्यते। प्रधानमन्त्री अवदत् यत् भारतस्य एषः दृष्टिकोणः छत्तीसगढ़-विधानसभायाः नूतन-भवने स्पष्टतया द्रष्टुं शक्यते, येन राज्यस्य समृद्ध-सांस्कृतिक-परम्परा प्रदर्श्यते ।रायपुरस्य स्वीयायाः एकदिवसीय यात्रावधौ प्रधानमन्त्री नवा-रायपुरे ब्रह्माकुमारीज़-संस्थायाः एवं शान्ति-शिखरस्यापि उद्घाटनं कृतवान्। एतत् केन्द्रम् तावत् आध्यात्मिक शिक्षायाः, शान्तेः तथा ध्यानस्य एकम् आधुनिकं केन्द्रम् अस्ति। अत्रावसरे भाषमाणः प्रधानमन्त्री अवोचत् यत् राष्ट्रस्य विकासः तस्य राज्यानां विकासेन सह सम्बद्धः अस्ति। तेनोक्तं यत् अस्य मन्त्रस्यैव मार्गदर्शनेन सर्वकारः भारतं विकसित राष्ट्रत्वेन निर्मातुं प्रतिबद्धोऽस्ति। प्रधानमन्त्री अवदत् यत् ब्रह्माकुमारीज़-सदृशाणि सङ्घटनानि एतादृशेषु प्रयासेषु महत्त्वपूर्ण भूमिकाम् आविष्कुर्वन्ति। इतः पूर्वं प्रधानमन्त्री नवा-रायपुरे श्री-सत्य-साईं-सञ्जीवनी-चिकित्सालयम् अवलोकितवान् यत्र सः मन की बात इत्याख्येन कार्यक्रमेण सार्ध-द्वि-सहस्रबालैः सह वार्ताम् अकरोत्। जन्मनः हृद्-रोगैः पीडितानाम् एतेषां बालकानां चिकित्सालये निःशुल्कः सफलोपचारो जातः। अवसरेऽस्मिन् प्रधानमन्त्री बालेभ्यः "जीवनदान-प्रमाण-पत्राणि" प्रायच्छत्। स्वीययात्रायां श्रीमोदी नवा-रायपुरे शहीद-वीर-नारायण-सिंह-स्मारकस्य तथा आदिवासी-स्वतन्त्रता-सेनानी-सङ्ग्रहालयस्य चापि उद्घाटनम् अवलोकनञ्च करिष्यति। प्रधानमन्त्री तावत् चतुर्दश-सहस्र-कोटि-रूप्यतोऽप्यधिकानां विकास-परियोजनानाम् उद्घाटनं शिलान्यासञ्च अकरोत्।

**सुभाषितम्**

**एतदेव परं शौर्यं, यत्परप्राणरक्षणम्।**
**नहि प्राणहरः शूरः, शूरः प्राणप्रदोऽर्थिनाम्।।**

संकट में पड़े हुए अन्य व्यक्तियों के प्राणों की रक्षा करना ही वीरता का सर्वोत्तम उदाहरण है। निश्चय ही दूसरों के प्राणों को हरने वाला व्यक्ति शूर नहीं हो सकता है। सच्चा शूर तो वही व्यक्ति है जो क्षमा मांगने वाले दोषी व्यक्तियों को जीवनदान देता है।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

## आन्ध्रप्रदेशे काशीबुग्गा-स्थिते श्री-वेङ्कटेश्वर स्वामी-मन्दिरे जनसमर्द्देन नवजनाः मृताः



**हिमसंस्कृतवार्ताः** - आन्ध्रप्रदेशे श्रीकाकुलम् जनपदस्य काशीबुग्गा क्षेत्रस्य श्री-वेङ्कटेश्वर स्वामी-मन्दिरे जनसमर्द्देन नवजनाः मृताः। एषा घटना एकादश्यां तिथौ अभवत् यदा भक्तानां विशाल जनसमूहः दर्शनार्थं समागतः । मृतकाः पलासा-काशीबुग्गा क्षेत्रयोः समीपस्थ निवासित्वेन संसूचिताः । व्रणिताः तावत् उपचारार्थं समीपस्थेषु चिकित्सालयेषु प्रवेशिताः सन्ति। राष्ट्रपति-पदासीना द्रौपदी-मुर्मूः, उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी इत्येते श्री-वेङ्कटेश्वर स्वामी-देवालयस्य दुःखद घटनामालक्ष्य शोकं प्रकटितवन्तः । श्रीमोदिना मृतकानां परिवारेभ्यः द्विलक्ष-रूप्यकाणां व्रणितानां च कृते पञ्चाशत्सहस्ररूप्यकाणां अनुग्रहराशेः घोषणा कृता ।

## लखनऊ-नगरं विशिष्ट-पाक-कलापरम्परायै यूनेस्को क्रिएटिव सिटी ऑफ गैस्ट्रोनॉमी इत्याख्येन सम्मानेन विभूषितम्




**हिमसंस्कृतवार्ताः** - समृद्धायाः विविधायाः च पाककला-परम्परायाः च कृते लखनऊ-नगरं यूनेस्को-संस्थायाः सृजनात्मक-नगराणां सूचौ समाविष्टम्। उज्बेकिस्तानस्य समरकन्द-नगरे आयोजिते यूनेस्को-संस्थायाः त्रिचत्वारिंशत्तमे महाधिवेशणे एतस्मै नगराय पाककला-श्रेण्यां मान्यता प्रदत्ता। अनेन सम्मानेन लखनऊ-नगरं विश्वस्य सप्तति-पाककला-नगरेषु अन्यतमं जातम् सहैव हैदराबाद्-नगरस्यानन्तरं अनेन उपाधिना विभूषितं एतत् द्वितीयं भारतीयनगरं समभवत् । उत्तरप्रदेशस्य पर्यटन-संस्कृति-मन्त्रिणा जयवीर सिंहेन अस्य निर्णयस्य स्वागतं कृतम्।

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## एशियाई-युवक्रीड़ा

## भारतेन बहरीन-नगरे पञ्चविंशत्यधिक-द्विसहस्रतमस्य एशियाई-युव-क्रीडासु अष्टचत्वारिंशत्-पदकानि सम्प्राप्य सर्वश्रेष्ठ-प्रदर्शनं कृतम्

**हिमसंस्कृतवार्ताः** - बहरीन-देशस्य मनामा-नगरे आयोजिते पञ्चविंशत्यधिक-द्विसहस्त्रतमे वर्षे एशियाई-युव-क्रीडायां भारतेन भव्यं प्रदर्शनं कृतम्, तत्र तावत् भारतेन त्रयोदश स्वर्णपदकानि, अष्टादश-रजतपदकानि, सप्तदश-कांस्यपदकानि समेत्य आहत्य अष्टचत्वारिंशत् पदकानि अधिगतानि । इयं पदकसंख्या तावत् द्विसहस्त्रतमस्य नवम-त्रयोदशवषपेिक्षया अत्यधिका आसीत्।



द्वाविंशत्यधिक-द्विशतं भारतीय-क्रीडकेषु, उल्लेखनीय-क्षणेषु बालिकानां कबड्डी-दलेन भारताय प्रथमं स्वर्णपदकं अधिकृतम् । प्रीतिस्मिता भोइ इत्येषा भारोत्तोलने विश्व-युव-कीर्तिलेखम् अस्थापयत्, तदनन्तरं अन्तिमदिने मुष्टा-मुष्टि-क्रीडायां कुश्तीक्रीड़ायाञ्च सप्त-सुवर्णपदकानि प्राप्य अद्भुतं प्रदर्शनं कृतम्।

## राज्यानां स्थापना-दिवसस्यावसरे राष्ट्रपतिः द्रौपदीमुर्मूः तत्रत्यानां जनानां कृते शुभकामनाः अयच्छन्

**हिमसंस्कृतवार्ताः** - राष्ट्रपतिः द्रौपदी-मुर्मूः प्रधानमन्त्री नरेन्द्रमोदी च आन्ध्रप्रदेश छत्तीसगढ-हरियाणा-कर्नाटक-केरललक्षद्वीप-मध्यप्रदेश-पञ्जाब-पुदुचेरी-राज्याणां जनेभ्यः राज्य-स्थापना-दिवसावसरे शुभकामनां प्रदत्तवन्तौ। सामाजिक सञ्जालीयसन्देशे राष्ट्रपतिः मुर्मुः अवदत् यत् एते सर्वे प्रदेशाः देशस्य प्रगतये महत्त्वपूर्ण योगदानं प्रयच्छन्ति इति ।

# "राज्ये चिट्टा इति मादकद्रव्यस्य विरुद्धं निर्णायकं युद्धं करिष्यति सर्वकारः, नवम्बर १५ दिनाङ्के शिमलातः आरम्भः भविता"- मुख्यमंत्री सुक्खुः




**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः उच्चस्तरीयसभायाः अध्यक्षतां कृत्वा घोषितवान् यत् राज्यसर्वकारः १५ नवम्बरतः चिट्टाविरुद्धं निर्णायकं युद्धम् आरभेत, तस्य पूर्णतया उन्मूलनं च करिष्यति। आगामिषु मासत्रयेषु चिट्टाविरुद्धं व्यापकं बहुविधं च अभियानम् आयोजितं भविष्यति। २०२५ तमस्य वर्षस्य नवम्बरमासस्य १५ दिनाङ्के शिमला-नगरस्य रिज-प्राङ्गणतः चौड़ा- मैदानपर्यन्तं "चिट्टाविरोधी-यात्रा" इति अभियानेन अस्य अभियानस्य आरम्भः भविष्यति। मुख्यमन्त्री अस्याः सभायाः उद्घाटनं करिष्यति। अस्यां सभायां विधायकाः, गणमान्यजनाः, छात्राः, समाजस्य सर्वेषां वर्गानां जनाः च भागं गृह्णन्ति। त्रिमासात्मके अभियाने चिट्टाविरुद्धं बहुपक्षीया कार्यविधिः भविष्यति। राज्यस्तरतः पंचायतस्तरपर्यन्तं एषा कार्यविधिः चिट्टाविरुद्धम् अद्यपर्यन्तं बृहत्तमः आघातः भविष्यति। अस्मिन् अभियाने सर्वकारप्रतिनिधिः, पुलिसः, विभिन्नविभागाः, स्वयंसेवकाः, छात्राः, अन्ये च विभिन्नस्तरेषु कार्यं करिष्यन्ति।

### मादकद्रव्यनिवारणजागरूकतायाः विषये विशेषं ध्यानं दीयते

अभियानस्य कालखण्डे मण्डलेषु, उपमण्डलेषु, अन्येषु च स्तरेषु चिट्टाविरोधी सभाः भविष्यन्ति। राज्यात् चिट्टा-इत्यस्य उन्मूलनार्थं पुलिसविभागस्य अन्तः विशेषप्रकोष्ठस्य निर्माणं भविष्यति। मुख्यमन्त्री स्वयं राज्यस्तरस्य अभियानस्य निरीक्षणं करिष्यति। मुख्यमन्त्री उक्तवान् यत् पुलिसविभागेन राज्ये चिट्टा-माध्यमेन सर्वाधिकं प्रभाविताः पंचायताः चिह्निताः। एतेषु पंचायतेषु विशेषं ध्यानं दीयते। महाविद्यालयेषु चिट्टाविरोधिनां स्वयंसेवकानां प्रशिक्षणं भविष्यति। अभियानस्य सफलतां सुनिश्चित्य पुलिसविभागः व्यापकयोजनां निर्मास्यति।

मुख्यमन्त्री उक्तवान् यत् राज्ये मादकद्रव्याणां, मादकौषधानां च प्रयोगं अवैधव्यापारं च निवारयितुं पंचायतस्तरस्य मादकद्रव्यनिवारणसमितीनां निर्माणं भविष्यति। अस्य कृते सूचना कृता अस्ति। समितौ अध्यक्षसहिताः सप्तसदस्याः भविष्यन्ति। समितिः नियमितरूपेण मासिकसमागमं करिष्यति, क्षेत्रे चिट्टा-इत्यस्य, तत्सम्बद्धानां च कार्याणां विस्तृतप्रतिवेदनानि सज्जीकृत्य विधिप्रवर्तनसंस्थाभिः सह सपष्टीकरिष्यन्ति। एताः समितयः विद्यालयेषु अन्येषु च सार्वजनिकस्थानेषु मादकद्रव्यनिवारणस्य, मादकद्रव्यस्य दुरुपयोगस्य दुष्प्रभावस्य च विषये विविधान् कार्यक्रमान् आयोजयिष्यति। एताः समितयः मण्डले स्वसम्बद्धानां उपायुक्तानां माध्यमेन स्वप्रतिवेदनानि प्रस्तूयन्ते, समन्वयं अपि स्थापयिष्यन्ति। मुख्यमन्त्री उक्तवान् यत् पंचायतस्तरस्य अवैधमादकद्रव्यव्यापारस्य निवारणे च मादकद्रव्यनिवारणसमितीनां महती भूमिका भविष्यति।

# Shri Renuka Fair- भगवान् श्रीपरशुरामः शिविकाम् आरुह्य मातरं मेलितुम् आगतः



**हिमसंस्कृतवार्ताः- नाहनम्।** राज्यस्य प्राचीनधार्मिकमेलासु अन्यतमः अन्ताराष्ट्रीय- श्रीरेणुकाजीमेला शुक्रवासरे औपचारिकरूपेण आरब्धः। मेलापकस्य आभासीयम् उद्घाटनं मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अकरोत्। दिल्लीतः मुख्यमन्त्री सुक्खुः श्रीरेणुकाजी विधानसभाक्षेत्रस्य कृते ₹29.50 कोटिरूप्यकाणां पञ्चविकासपरियोजनानाम् उद्घाटनं कृत्वा शिलान्यासं कृतवान्। मुख्यमन्त्री मैनाबाग, संगड़ाहतहसीलस्य ₹6.47 कोटिरूप्यकाणां व्ययेन निर्मितस्य राज्यस्य औद्योगिक-प्रशिक्षण- संस्थाभवनस्य, नौहराधरे ₹2.20 कोटिरूप्यकाणां व्ययेन निर्मितस्य उपविपणि-यार्डचरणस्य प्रथमस्य च उद्घाटनं कृतवान्। तेन द्विकोटिरूप्यकाणां व्ययेन निर्मितस्य रेणुकाजी-ददाहु बिड़ला-मार्गस्य, रेणुकाजी- विधानसभाक्षेत्रस्य विभिन्नग्रामाणां कृते १७.८९ कोटिरूप्यकाणां सिञ्चनसुविधायाः, ग्रामपंचायतयोः भराड़ी-नौहराधारयोः चोकन, ठाण्डी, हरिजन बस्तीचुमानु, कुदागस्य च ग्रामाणां कृते ९४ लक्षरूप्यकाणां गुरुत्वाकर्षणजलापूर्तियोजनायाः रोण्डीसेतोः च शिलान्यासः कृतः। मुख्यमन्त्रिणः आभासीय कार्यक्रमात् पूर्वम् उद्योगमन्त्री हर्षवर्धनचौहानः विधानसभा उपाध्यक्षः विनयकुमारः विधायकः अजय सोलङ्की चेत्येतेषाम् उपस्थितौ भगवतः परशुरामस्य देवशिविकाः पूजां कृत्वा शोभायात्रारूपेण रेणुकाजीं प्रेषिता। अस्मिन् अवसरे प्रथमवारं देवघाटे श्री रेणुकाजी इत्यत्र ५०० तः अधिकानां दीपानाम् आरार्तिक्यम् आरब्धम्। अस्मिन्नवसरे उद्योगमंत्री हर्षवर्धनः चौहानः, विधानसभायाः उपाध्यक्षः विनयकुमारः, नाहनविधायकः अजय सोलंकी, उपायुक्तः सिरमौरः प्रियंका वर्मा, पुलिसाधीक्षक निश्चिन्तः नेगी एवम् अन्येषां विभिन्नविभागानाम् अधिकारिणः उपस्थिता अभवन्।

### सांस्कृतिकप्रदर्शनैः प्रेक्षकाणां मनोरञ्जनम्

अन्ताराष्ट्रीयश्रीरेणुकाजीमेलायां शुक्रवासरे प्रथमायां सांस्कृतिकसांध्यायां प्रसिद्धः पंजाबीगायकः कुलविन्दरबिल्ला तारकप्रस्तौतारूपेण प्रदर्शनं कृतवान्। पूर्णशिवा, गीताभारद्वाज इत्यादयः अन्ये तारकाः कलाकाराः मनोहरप्रदर्शनैः प्रेक्षकान् मोहितवन्तः। अपि च उत्तरक्षेत्रीयसांस्कृतिकसमित्याः पंजाबीदलेन सह हमीरपुरस्य सिरमौरस्य च कलाकारैः सह अपि प्रभावशालिनानि प्रदर्शनानि अभवन्।


# HPBOSE Dharmshala - उत्तरपुस्तिकानां छेदनस्य न्यायवैज्ञानिकपरीक्षणं कारयिष्यति विद्यालयशिक्षणमण्डलम्



**हिमसंस्कृतवार्ता - डॉ पद्मनाभः।** बिलासपुरम्। हिमाचलप्रदेशस्य शिक्षाखण्डे झण्डूतायाः राजकीयउच्चपाठशालायाः ज्योरानामकविद्यालयस्य छात्राणां पक्षे बोर्डपरीक्षायाः कलाविषयस्य उत्तरपुस्तिकासु कृतं छेदनं इति आरोपः कृतः अस्ति। अनेन प्रकरणेन सम्बन्धं दृष्ट्वा हिमाचलप्रदेशविद्यालयशिक्षणमण्डलं न्यायिकवैज्ञानिकपरीक्षणं कारयिष्यति। श्रेष्ठा, भारती, अञ्जली, शालिनी, निधी इत्येताः छात्राः अभ्युक्तवन्त्यः यत् ते मार्च् २०२५ तमवर्षे दशमकक्षायाः परीक्षा अलिखन्। परिणामघोषणायाः कृते सर्वेषु विषयेषु शुभाङ्काः लब्धाः, केवलं कलाविषये न्यूनाङ्काः अभवन्। पुनर्मूल्याङ्कनस्य अनन्तरमपि परिणामे परिवर्तनं नाभवत्, अतः ताः छात्राः आरटीआई (सूचनाअधिकारः) मार्गेण स्वीयाः उत्तरपुस्तिकाः याचितवन्त्यः। प्राप्तासु तासु पत्रिकासु स्पष्टं दृश्यते यत् कटिंग् (छेदनम्) तथा उत्तरपरिवर्तनं कृतम् इति। ताः छात्राः स्व-अभिभावकैः सह बिलासपुरजनपदस्य उपायुक्तद्वारा राज्यपालाय मुख्यमन्त्रिणे च ज्ञापनं प्रेषितवत्यः, यस्मिन् निष्पक्षं उच्चस्तरीयं च अन्वेषणं दोषिनां च विरुद्धं कठोरकार्यविधिः च प्रार्थिता। अभिभावकाः उक्तवन्तः—"बालानां परिश्रमः व्यर्थः जातः, ते छात्रवृत्तेः वञ्चिताः, तेषां मनोबलं च भग्नम्।" अस्य प्रकरणस्य विषये शिक्षणमण्डलस्य सचिवः डॉ॰ मेजर् विशालशर्मा उक्तवान्—"छात्राः पूर्वमेव आगत्य स्वोपालम्भान् दत्तवन्तः। तत्क्षणमेव तस्यां संज्ञानं गृहीतम्। छात्रान् आहूय तेषां उत्तरपुस्तिकाः अपि दर्शिताः। तासु छेदनं दृश्यते, परं एषः निश्चयो नास्ति यत् सा बालकैः कृता उतान्यैः।"सचिवेन उक्तम्—"उत्तरपुस्तिकानां न्यायिकवैज्ञानिकपरीक्षणं भविष्यति। यदि परीक्षायां छेदनं सिद्धं भवति, तर्हि दोषिनां प्रति कठोरतमां कार्यविधिः करिष्यामः।"

# सरदारपटेलविश्वविद्यालये मण्डी इत्यत्र “राष्ट्रनिर्माता सरदारपटेलः - प्रशासनम्, एकता, विकसितभारतम्– 2047” इति विषये राष्ट्रियसंगोष्ठी आयोजिता

## “लौहपुरुषः सरदारपटेलः 150 वर्षाणां प्रेरणा, संस्मरणं, श्रद्धांजलिः च” इति पुस्तकस्य विमोचनम्



हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा।सरदारपटेलविश्वविद्यालये मण्डी इत्यत्र इतिहासविभागद्वारा लौहपुरुषस्य सरदारवल्लभभाई पटेलस्य 150तमायां जयंत्यवसरे “राष्ट्रनिर्माता सरदारपटेलः, प्रशासनम्, एकता, विकसितभारतम्– 2047” इति विषये एकदिवसीया राष्ट्रियसंगोष्ठी आयोजिता। अत्र मुख्यातिथिरूपेण चंद्रशेखरमहोदयः, विधायकः, धर्मपुरविधानसभाक्षेत्रं विश्वविद्यालयस्य कार्यकारिणी परिषदः सदस्यश्च आसीत्। कार्यक्रमस्य अध्यक्षता कुलगुरुः आचार्यः ललितकुमार अवस्थी अकरोत्। कार्यक्रमस्य शुभारम्भः पारम्परिक विधिना ज्योतिप्रज्वलनेन, सरस्वतीवंदनया च अभवत्। तदनु सर्वैः सामूहिकरूपेण ‘वन्दे मातरम्’ राष्ट्रगीतस्य गायनं कृत्वा राष्ट्रनिष्ठायाः एकतायाश्च संदेशः प्रदत्तः। मुख्यातिथिः चंद्रशेखरवर्यः स्वप्रेरक- उद्बोधने उक्तवान् यत् सरदार वल्लभभाईपटेलः भारतस्य लौहपुरुषः, राष्ट्रनिर्माणस्य एकतायाः च वास्तविकशिल्पी आसीत्। तेनोक्तं यत् सम्प्रति भारतं विकसितराष्ट्रस्य रूपेण अग्रे नेतु अस्माभिः सरदारपटेलस्य कार्यशैली, दृढ़संकल्पः, प्रशासनिकदक्षता च अनुकरणीया। अध्यक्षीये उद्बोधने आचार्यः ललितकुमार अवस्थी अकथयत् यत् सरदारपटेलस्य जीवनम् अनुशासनस्य, संगठनस्य, सेवायाः च आदर्श- उदाहरणमस्ति। तस्य विचाराः सम्प्रत्यापि प्रशासनिकदक्षतायाः राष्ट्रीयएकतायाः,सुशासनकृतेच मार्गदर्शकाः सन्ति। सः बलं दत्तवान् यत् विकसितभारतम्– 2047 इत्यस्य स्वप्नं तदा एव साकारं भविष्यति यदा वयं तस्य मूल्यानि कार्यपद्धतिं च स्वीकुर्मः। कार्यक्रमे वक्तारूपेण आचार्यः सुरेन्द्र डी. सोनी, सेवानिवृत्तः आचार्यः, चुरू राजस्थानं स्वविस्तृते वक्तव्ये विचारं दत्तम्। सः अवदत् यत् सरदारपटेलस्य राजनीतिकदक्षता, संगठनक्षमता, निर्णयशक्तिद्वारा एव अद्य भारतदेशः अखण्डराष्ट्रस्य रूपेण वर्तते। विशिष्टातिथिरूपेण आचार्यः डॉ. राजेशकुमारशर्मा, अधिष्ठाता, छात्रकल्याणं उक्तवान् यत् सरदारपटेलस्य व्यक्तित्वं युवावर्गस्य कृते प्रेरणा वर्तते। युवावर्गः तस्य जीवनात् दृढ़ता, अनुशासनं नेतृत्वगुणाः च स्वीकरोतु। संगोष्ठीसंयोजकः डॉ. राकेशकुमारशर्मा, विभागाध्यक्षः, इतिहासविभागः संगोष्ठेः उद्देश्यानि वर्णनयन् कथितं यत् इयं संगोष्ठी सरदारपटेलस्य योगदानं स्मरति, प्रशासनं, नीतिनिर्माणं, तस्य राष्ट्रीयएकतायाः दृष्टिकोणमपि नवीनभारतस्य परिप्रेक्ष्ये अवागमनस्य अवसरं प्रददाति। डॉ. राकेशकुमारशर्माद्वारा सम्पादितं “लौहपुरुषः सरदारपटेलः 150 वर्षाणां प्रेरणा, संस्मरणं, श्रद्धांजलिः च” इति शीर्षकेन प्रकाशितस्य विशेषपुस्तकस्य विमोचनमपि मुख्यातिथिः कुलगुरुमहोदयेन् कृतम्। अस्मिन् पुस्तके विभिन्नविदुषां, शिक्षकाणां विद्यार्थिनां च लेखाः, संस्मरणं श्रद्धांजलयश्च संकलिताः सन्ति। कार्यक्रमस्य अंते डॉ. राकेशकुमारशर्मा धन्यवादप्रस्तावः प्रस्तुतः। यत्र सर्वेषां अतिथीनां, प्रतिभागिनां आयोजनसमितेः, शिक्षकाणां, विद्यार्थिनां, विश्वविद्यालयप्रशासनस्य च आभारः व्यक्तः। मंचसंचालनं वेदप्रकाशः कुशलतापूर्वकं कृतम्। कार्यक्रमें डॉ. कर्णगुप्ता, अधिष्ठाता अकादमिकः, डॉ. लखवीरसिंहः अधिष्ठाता शोधः, डॉ. पवनचाँदः, डॉ. अक्षयकुमारः, डॉ. चेतनचौहानः, डॉ. रामपालः, विकेशकुमारः, राजेशकुमारसहितं शिक्षकाः, शोधार्थिनः, विद्यार्थिनः उपस्थिताः सन्ति। सरदारपटेलस्य आदर्शेभ्यः प्रेरणां प्राप्तुम्, “एकभारतम्, श्रेष्ठभारतम्” इत्यस्य संकल्पं पूरयितुमपि संकल्पः कृतः।

# विजयः भयात् परे अस्ति... करुणया भयः पराजितः, हिमाचलप्रदेशस्य प्रथमम् अद्वितीयं प्रकरणम्



**हिमसंस्कृतवार्ताः- हमीरपुरम्।**
प्रायः जनाः सर्पान् दृष्ट्वा भीताः भवन्ति, तेषां वधार्थं त्वरयन्ति च। परन्तु हमीरपुरमण्डले मानवतायाः करुणायाश्च अद्वितीयम् उदाहरणं दृष्टम् अस्ति। मण्डलस्य बड़सर-उपमण्डले स्थिते जजरीग्रामे ग्रामजनाः भयम् अतिक्रम्य ७ पाददीर्घस्य आहतस्य कृष्ण-कोबरा इत्यस्य प्राणान् रक्षितवन्तः। हिमाचलप्रदेशे एतद् प्रथमं प्रकरणं यत्र विषयुक्तस्य सर्पस्य सफलतया चिकित्सा कृता, पुनः वन्यजीवेषु मुक्तः च अभवत्। इयं घटना बड़सर उपमण्डलस्य जाजरीग्रामनिवासिनः ओमप्रकाशस्य पशुशालायां घटिता। कतिपयदिनानि पूर्वं प्रचण्डवृष्ट्या तस्य पशुशाला पतिता। मलिनमलिनतां निष्कासयन्ते सति ग्रामजनाः मलिनमण्डपस्य अधः निरुद्धं विशालं सर्पम् आविष्कृतवन्तः। सर्पः भृशं क्षतिग्रस्तः, चलितुम् असमर्थः च आसीत्। परिस्थितेः गम्भीरतां दृष्ट्वा ग्रामजनाः तत्क्षणमेव सेनायाः सेवानिवृत्तस्य सर्पग्रहणस्य जसवीरपटियालेन साकं सम्पर्कं कृतवन्तः। जसवीरः घटनास्थले स्वप्राणान् संकटापन्नं कृत्वा सावधानतया सर्पस्य उद्धारं कृतवान्। सः पुरुषसर्पः इति अवदत्, स्त्रीसर्पः तु भग्नावशेषात् सुरक्षिततया पलायितुं समर्थः अभवत्। जसवीरः प्रारम्भे आहतं कोबरां स्वेन सह नीत्वा प्राथमिकचिकित्सां कृतवान्, परन्तु यदा तस्य स्थितिः क्षीणतां प्रारभत तदा सः वनविभागात् पशुपालनविभागात् च साहाय्यं याचितवान् वनविभागस्य दलेन तत्क्षणमेव प्रतिक्रिया दत्ता, ततः सः सर्पः बिझड़ीस्थे पशुचिकित्सालये नीतः, यत्र डॉ. विश्वदीपराठौरः तस्य चिकित्सां कृतवान्। डॉ. राठौरः व्याख्यातवान् यत् सर्पस्य पृष्ठे कटिभागे च गभीराः व्रणाः आसन्, येन संक्रमणस्य संकटः आसीत्। चिकित्साकाले तस्य रोगाणुनाशकौषधं दत्तं, तस्य कृते द्वौ सिलेन्थौ आवश्यकौ। डॉ. राठौरस्य मते अस्य कार्यक्षेत्रस्य प्रथमवारं विषयुक्तस्य सर्पस्य एतादृशं चिकित्सां कृतवान्। दिनद्वयस्य अवलोकनानन्तरं यदा सर्पः सम्पूर्णतया स्वस्थः आसीत् तदा सः सघनवने मुक्तः अभवत्। हमीरपुरस्य डीएफओ अंकितकुमारसिंहः हिमाचलस्य प्रथमं एतादृशं प्रकरणम् इति कथयन् दलस्य समर्पणस्य संवेदनशीलतायाः च प्रशंसाम् अकरोत्। सर्पग्राहकः जसवीर पटियालः अवदत् यत् पृथिवीग्रहः केवलं मनुष्याणां कृते एव नास्ति; सर्वेषां जीवानां अत्र निवासस्य अधिकारः अस्ति। एषा घटना वन्यजीवानां प्रति करुणायाः प्रेरणादायकम् उदाहरणं जातम् अस्ति।

# एडीएमएम-प्लस् भारतस्य 'एक्ट्-ईस्ट्-नीतेः' तथा तस्य व्यापक-हिन्द-प्रशान्त-दृष्टिकोणस्य एकम् अभिन्नम् अङ्गम् अस्ति - रक्षामन्त्री राजनाथसिंहः



**हिमसंस्कृतवार्ताः -** रक्षामन्त्री राजनाथसिंहः अवदत् यत् भारतं आसियान्देशैः तथैव प्लस्-देशैः सह स्वकीयं रक्षा-सहयोगम् क्षेत्रीय-शान्तौ, स्थिरतायां क्षमता-निर्माणे योगदानरूपेण पश्यति । श्रीसिंहः मलेशिया-देशस्य क्वालालम्पुर नगरे आयोजिते द्वादशे आसियान्-रक्षामन्त्रिणामुपवेशने एतत् प्रख्यातवान् । सः सबलं प्रावोचत् यत् एडीएमएम-प्लस् भारतस्य 'एक्ट्-ईस्ट्-नीतेः' तथा तस्य व्यापक-हिन्द-प्रशान्त-दृष्टिकोणस्य एकम् अभिन्नम् अङ्गम् अस्ति। रक्षामन्त्रिणा एतदपि प्रकाशितं यत् भारतस्य हिन्द-प्रशान्त-सुरक्षा-दृष्टिकोणः रक्षा-सहयोगम् आर्थिक विकासेन, प्रौद्योगिक-विनिमयेन मानव संसाधनोन्नयनेन च च सह सम्बन्धयति संयोजयति।

# चरित्रनिर्माणव्यक्तित्वस्य च समग्रविकासार्थं त्रिदिवसीया राष्ट्रीयकार्यशाला आयोजिता



हिमसंस्कृतवार्ताः- प्रवेशकुमारशुक्लः, भोपालम्)केंद्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे, नवदिल्लीस्थितशिक्षा- संस्कृत्योत्थानन्यासस्य च संयुक्ततत्त्वावधाने "चरित्रनिर्माणं व्यक्तित्वस्य समग्रविकासश्च" इति विषये त्रिदिवसीया राष्ट्रीयकार्यशाला आयोजिता। अस्याः कार्यशालायाः द्वितीयदिने चत्वारि सत्राणि सफलतया सम्पन्नानि अभवन्। प्रथमसत्रे वरिष्ठः सुप्रतिष्ठितः विद्वान् शिक्षाविद् प्रो. चांदकिरणसलूजा आसीत्। ते भारतीयशास्त्रे उल्लिखितानां पञ्चकोशानाम् (अन्नमयः, प्राणमयः, मनोमयः, विज्ञानमयः, आनन्दमयः) आधारे चरित्रनिर्माणस्य व्यक्तित्वविकासस्य च प्रक्रियाम् आधुनिकसन्दर्भे कथमधिगन्तुं शक्यते इति विषयं रोचकया एवं सुस्पष्टया भाषया प्रतिपादितवन्तः। प्रो. सलूजा एवमुक्तवन्तः- "शिक्षायाः परमलक्ष्यमस्ति मानवजीवनस्य सर्वाङ्गविकासेन विश्वकल्याणस्य साधनम्। अन्नमयादिषु कोशेषु संपूर्णविकासः साध्यः स्यात्तर्हि वर्तमानपौरुषे बहवः क्लेशाः, यैः सरलैः उपायैः विजयः साध्यः इति।" ते अपि उक्तवन्तः यत् राष्ट्रियशिक्षानीतिः २०२० एतानि बिन्दूनि सम्यक् प्रकारेण निवेशितानि अस्ति। प्रो. सलूजा "शिक्षकः स्वाचाराचरणेन स्वजीवनोदाहरणेन च शिक्षां ददाति तस्य शिक्षणं सर्वाधिकं प्रायोगिकं च प्रभावशाली च भवति" इति अपि प्रकाशयामास।कार्यशालायाम् आगता डॉ. अनीता शर्मा अन्नमयकोशे भूत्वा विभिन्नानाम् खाद्यविकाराणां मानवजीवने कृतानां प्रभावानां विषये विस्तृतं भाषणं प्रदत्तम्। डॉ. रंजनद्विवेदी विज्ञानमयकोशस्य, डॉ. अजयतिवारी प्राणमयकोशस्य विषययोः प्रस्तुतिः अकरोत्। सप्तमे सत्रे ओमप्रकाशशर्मणः भारतीयज्ञानपरम्परायाः महत्त्वं निर्दिश्य उक्तवान् यतः भारतीयज्ञानपरम्परा सूक्ष्मतमानां जीवनबिन्दून् अपि सम्मान्य समग्रसृष्टेः कल्याणस्य संदेशं दत्तवती अस्ति। एषा परम्परा सर्वेषु युगेषु प्रासङ्गिका इति।द्वितीयदिने सत्राणां संचालनं डॉ. जितेन्द्रतिवारी, डॉ. संजयद्विवेदी, डॉ. कृष्णकान्ततिवारी, डॉ. राहुलपाण्डेय इत्येभ्यः सम्यक् प्रकारेण कृतम्। कार्यशाला विदुषी-विद्वद्भ्यः शिक्षकेभ्यश्च सम्यगाभिनन्द्य समापनसमये भविष्यकालीन- क्रियाप्रवर्तनेषु प्रेरणादायिनी इति अभितो निष्कर्षः प्राप्तः।

# सामान्यप्रेक्षकः हनीश छाबड़ा इत्यनेन सुगौली- विधानसभाक्षेत्रे ई. वी. एम. संवीक्षणं, प्रशिक्षणकार्यस्य निरीक्षणं कृतम्



हिमसंस्कृतवार्ताः- कुणाल कौशिकः, मोतिहारी।एकादश सुगौलीविधानसभा-निर्वाचनक्षेत्रस्य सामान्यप्रेक्षकः हनीश छाबड़ा अद्य नन्द +2 उच्चविद्यालये सुगौलीस्थिते प्रेषणकेन्द्रे ई.वी.एम. (Electronic Voting Machine) उपकरणस्य संवीक्षणकार्यं सम्यक् अवलोकितवान्। संवीक्षणकाले तेन कर्मणि नियोजिताः अधिकारिणः पृष्टाः, सर्वान् सावधानतया पारदर्शकरीत्या च कर्म कर्तुं निर्देशितवान्।अस्मिन्नेव अवसरे ११-सुगौलीविधानसभाक्षेत्रस्य पुनरागमन-अधिकारी (Returning Officer) सह उप-मण्डलाधिकारी (SDM) श्वेता भारती, सहायक- निर्वाचन- अधिकारी सुगौली, अन्ये पदाधिकारिणः च उपस्थिताः आसन्। तदनन्तरं प्रेक्षकमहोदयेन सी. एस. डी. ए. वी. सार्वजनिकविद्यालये बनकटे चालमानं मतदानकर्मिणां प्रशिक्षणकार्यक्रमम् अपि निरीक्षितम्। तेन सर्वान् कर्मिणः निर्दिष्टवान् यत् ते स्वस्य मास्टरप्रशिक्षकस्य दूरभाषसङ्ख्यां गृहीत्वा धारयन्तु, मतदानदिने यदि काचिद् समस्या जायते चेत् शीघ्रं सम्पर्कं स्थापयन्तु। अन्ते प्रेक्षकमहोदयः तेनैव विद्यालये सञ्चालिता डाकमतपत्र- मतदानप्रक्रिया (Postal Ballot) अपि अवलोकिता, तत्र उपस्थितानाम् आवश्यकसूचनाः अपि प्राप्ता।

# "ईश्वरभक्तिः"

कदाचित् गुरुनानकः केनापि पृष्टः- पञ्चछिद्रयुक्तः घटः कथं पूरणीयः इति? स्मितवदन् गुरुनानकः उक्तवान् यदि घटः जले एव न्यस्यते तर्हि घटः सदैव पूरितः अस्ति। तद्वद् अस्माकं पञ्चेन्द्रियाणि सदैव ईश्वरचिन्तने निमग्नानि चेत् तर्हि एषः संसारः कथं दूषयिष्यति।

**डॉ. वर्षा प्रकाश टोणगांवकर**
**पुणे/ महाराष्ट्रम्**



# विशेषः-

केरलस्य एकस्मिन् ग्रामे महिलाः नारिकेलतः सुन्दर- पर्यावरण- अनुकूला पादरक्षा निर्माय उदाहरणं स्थापितवत्यः। ताः पादरक्षाः अधुना विदेशेषु विक्रीयन्ते, महिलानां कृते रोजगारस्य नूतनः मार्गः उद्घाटितः अभवत्। अवकरं न्यूनः कृत्वा महिलानां कृते नूतनः आयस्य स्रोतः कुर्वन् पर्यावरणाय लाभप्रदं कृतवत्यः। एषः उपक्रमः स्थानीयसमुदायम् आत्मनिर्भरं कृत्वा पर्यावरण-रक्षणस्य उत्तमम् उदाहरणम् अस्ति।


# १०८ संख्यायाः महत्त्वम्

हिन्दूधर्मे अध्यात्मक्षेत्रे च १०८ संख्यायाः बहु महती अस्ति, नानाधर्माध्यात्मेषु प्रयुज्यते च।
१ = एकः एव ईश्वरः अस्ति
० = सर्वव्यापी अस्ति
८ = कालः असीमितः अस्ति
हृदयचक्रतः अपि १०८ तन्त्रिकाः योजिताः सन्ति, ये आत्मान् परमात्मना सह संयोजयन्ति। अतः मालायां मणितः आरभ्यः सर्वेषां देवानाम् उपनिषदानां च नामानि अपि सामान्येन १०८ सन्ति।

# पति-पत्न्योः मध्ये हास- परिहासम्

1पत्नी- वशीकरणं किं कथ्यते?
पतिः- यदि कोऽपि वशे भूत्वा कार्यं करोति, तर्हि तस्य उपरि वशीकरणम् अभवत् इति उच्यते।
पत्नी- न, तं तु विवाह इति उच्यते! 😳
पतिः 😡 😡 😡

2पतिः- एकस्य प्रश्नस्य उत्तरं ददातु- किमर्थं विवाहपत्रस्य उपरि युवत्याः नाम्नः सम्मुखे "सौ" लिखितम् अस्ति तथा च पुरुषस्य नाम्नः सम्मुखे "चि" लिखितम् अस्ति?
पत्नी- विवाहपत्रस्यमुद्रकः अपि जानाति विवाहस् अनन्तरं पत्नी (सौ- हिन्द्याम् अस्ति) शतं वार्ताः वदिष्यति, पतिः च 'चि' अपि न कर्तुं शक्ष्यति 🤣 😂 😃
पतिः- 😡 😡 😡 😡



✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# पतञ्जलिः एवम् आयुर्वेदः

शरीरस्य शुद्ध्यर्थं वैद्यकीय-शास्त्रस्य, वाण्याः शुद्ध्यर्थं व्याकरण-शास्त्रस्य, एवं चेतसः शुद्ध्यर्थं योग-शास्त्रस्य प्रणेता महर्षिः पतञ्जलिः प्रसिद्धः वर्तते लोके। महाभागस्य जन्म जननी-गोणिकातः सञ्जातम्। तत्परिवारः गोनर्द्देशे निवसति स्म। तेन महर्षिणा पाणिनेः 'अष्टाध्यायी' नामधेयं प्रसिद्धं व्याकरणम् आधारीकृत्य महाभाष्यं विरचितम्।
भगवान् शेषः यदा अथर्ववेदतः आयुर्वेदं प्राप्तवान् आसीत्, तदा श्रीहरिः मत्स्यावतारं स्वीकृत्य वेदानाम् उद्धारं कृतवान्। तत्समये भगवान् अनन्तः गुप्तरूपेण पृथिव्यां विचरन् आसीत्। तदा मनुष्याः, इतरप्राणिनः च शारीरिक-मानसिक-रोगैः नितरां पीडिताः, नानाकष्टक्लेशान् भुञ्जानाः आसन्, तेषां तद्दुर्दशाम् अवलोक्य प्रभोर्मनसि दया समागता। तस्मात् सः पृथिव्याम् अवतीर्णः अभवत्। तेन शारीरिक-व्याधेः निर्मूलार्थम् आयुर्वेदः प्रकटीकृतः। यतोहि सः चरवत् पृथिव्यां पूर्वम् आगतः आसीत्। आयुर्वेदकर्तृरूपेण तस्य नाम 'चरकः' इति जातम्। सः हि भगवान् अनन्तः 'पतञ्जलिः' नाम्ना ख्यातः अभवत्। तेन हि पतञ्जलि-मुनिना योगदर्शनम् एवं महाभाष्यं च विरचितम्।श्रीचरकमुनिः आयुर्वेदे आत्रेय-ऋषेः परम्परां प्रतिपादितवान्। आत्रेयमुनेः शिष्यः अग्निवेशः आयुर्वेदम् अधिकृत्य नैकान् ग्रन्थान् विरचितवान्। तत्सर्वं सारतत्त्वं चरकसंहितायां सङ्कलितम् अभवत्। एतस्याः चरकसंहितायाः अन्ते तत्कर्ता अग्निवेशः कथितोऽस्ति। भावप्रकाशस्य रचयितापि भगवन्तं चरकं चिकित्सा-ज्ञानस्य संकलनकर्तारम् अकथयदिति, शम्।